# चतुर्थोऽध्यायः
# (समीक्षात्मकः)

# चतुर्थोऽध्यायः (समीक्षात्मकः)

1. राजयोगानां विविधोदाहरणानि ।

2. ज्योतिषशास्त्रोक्तराजयोगानां समीक्षणम् ।

3. राजयोगानां विश्लेषणात्मकाध्ययनम् ।

4. राजयोगानां विषये विविधमतानां विश्लेषणम् ।

## 1.राजयोगानां विविधोदाहरणानि

**ज्योतिषशास्त्रे विविधानि राजयोगानि सन्ति। तद्यथा ——**

| **क्रमः** | **योगाः** | **क्रमः** | **योगाः** |
|---|---|---|---|
| 1 | गजकेशरीयोगः | 48 | देवतुल्यराजयोगः |
| 2 | मालव्ययोगः | 49 | प्रसिद्धराजयोगः |
| 3 | अखण्डसाम्राज्ययोगः | 50 | ब्राह्मणराजयोग |
| 4 | अधियोगः | 51 | सकलनृपपालक राजयोगः |
| 5 | चन्द्राधियोगः | 52 | अन्यजातः राजयोगः |
| 6 | सरस्वतीयोगः | 53 | कुत्सितराजयोगः |
| 7 | महाभाग्ययोगः | 54 | निराकूलराजयोगः |
| 8 | काहलयोगः | 55 | सचिवराजयोगः |
| 9 | इन्द्र–तुल्ययोगः | 56 | विपुलसम्पत्तिवान राजयोगः |
| 10 | भद्रयोगः | 57 | नगरराजयोगः |
| 11 | भेरीयोगः | 58 | प्रशान्तराजयोगः |
| 12 | अमलायोगः | 59 | कलशसंज्ञित राजयोगः |
| 13 | कारकयोगः | 60 | सकललोक नमस्कृत्य राजयोगः |
| 14 | शारदायोगः | 61 | पुष्कलराजयोगः |
| 15 | विज्ञानयोगः | 62 | नक्षत्रगतराजयोगः |
| 16 | लक्ष्मीयोगः | 63 | सार्वभौमिक |

| | | | |
|---|---|---|---|
| | | | राजयोगः |
| 17 | वेशियोगः | 64 | लोककल्याणकारी राजयोगः |
| 18 | वोशियोगः | 65 | अंशात्मक राजयोगः |
| 19 | श्रीनाथयोगः | 66 | अहंकारी राजयोगः |
| 20 | शशयोगः | 67 | कुबेरकल्पधनी राजयोगः |
| 21 | वसुमतयोगः | 68 | त्रिसमुद्रपारमः राजयोगः |
| 22 | आकस्मिकधनप्राप्ति योगः | 69 | मंगलगतराजयोगः |
| 23 | भास्करायोगः | 70 | सिंहासनधिशासायी राजयोगः |
| 24 | केमद्रमयोगः | 71 | नृपवन्दितः राजयोगः |
| 25 | दुरधरायोगः | 72 | सुनफाादि राजयोगः |
| 26 | अखिलभूमंण्डलयोगः | 73 | स्थिरलक्ष्मी राजयोगः |
| 27 | रुचकायोगः | 74 | चन्द्रकिरणकल्प राजयोगः |
| 28 | हंसयोगः | 75 | स्वगुणाख्या राजयोगः |
| 29 | विज्ञानयोगः | 76 | द्विपाधिराजयोगः |
| 30 | सद्भूपालयोगः | 77 | त्रिभुवनाधिप |

| | | | |
|---|---|---|---|
| | | | राजयोगः |
| 31 | अधिकलक्ष्मीयोगः | 78 | लग्नस्य बृहस्पति राजयोगः |
| 32 | सकलकलाख्ययोगः | 79 | भुजेन्द्रतुल्य राजयोगः |
| 33 | शत्रु अजेययोगः | 80 | त्रिसमुद्रवेष्टित भूपालक राजयोगः |
| 34 | शत्रुपराजित कर्ताराज्य योगः | 81 | अस्थिर राजयोगः |
| 35 | स्वभूमिबलेन पृथ्वीपति राजयोगः | 82 | द्विजदेवभक्त राजयोगः |
| 36 | आसमुद्रराजयोगः | | |
| 37 | चन्द्रातराजयोगः | | |
| 38 | उच्चनाथराजयोगः | | |
| 39 | शत्रुहन्ताराजयोगः | | |
| 40 | सार्वभौमराजयोगः | | |
| 41 | देव–दानववादिता राजयोगः | | |
| 42 | सागरादितुल्यराजयोगः | | |
| 43 | तपस्वीराजयोगः | | |
| 44 | बृहस्पतिराजयोगः | | |
| 45 | निषादकुलोत्पन्न राजयोगः | | |
| 46 | महाराजयोगः | | |
| 47 | नीचकुलोत्पन्न राजयोगः | | |

| क्रमः | योगाः | क्रमः | योगाः |
|---|---|---|---|
| 1 | राजाधिराजयोगः | 31 | नगरयोगः |
| 2 | नृपयोगः | 32 | राहुकृतराजयोगः |
| 3 | नीचभङ्गयोगः | 33 | दिग्बयुक्तराजयोगः |
| 4 | भूपतिभाग्ययोगः | 34 | ध्वजयोगः |
| 5 | ऐश्वर्यप्रद योगः | 35 | मानीयोगः |
| 6 | नृपमानसमन्वित राजयोगः | 36 | अष्टकवर्गकृत राजयोगः |
| 7 | राजराजेश्वर राजयोगः | 37 | कल्पवृक्ष राजयोगः |
| 8 | गौरीयोगः | 38 | कामधेनुराजयोगः |
| 9 | श्रीछत्रयोगः | 39 | कुलभूषणराजयोगः |
| 10 | राजयोगभङ्गयोगः | 40 | गोपकुलोत्पन्नराजयोगः |
| 11 | नृपतुल्ययोगः | 41 | पद्मरागराजयोगः |
| 12 | मन्त्रीयोगः | 42 | श्रीवत्सयोगः |
| 13 | भूपतियोगः | 43 | सिंहासनयोगः |
| 14 | वक्रग्रहकृतयोगः | 44 | नीचभङ्गयोगः |
| 15 | पृथ्वीशयोगः | 45 | गौरीयोगः |
| 16 | ऐश्वर्यप्रदयोगः | 46 | शत्रुपीडाकारयोगः |
| 17 | कारिकायोगः | 47 | राजाधिराजयोगः |
| 18 | रत्नांजलिसयोगः | 48 | राजतुल्ययोगः |
| 19 | अखण्डसाम्राज्यराजयोगः | 49 | उल्कादिभियोगः |
| 20 | डोलायोगः | 50 | शुक्रेधराजभङ्गयोगः |
| 21 | श्रीनाथयोगः | 51 | परमनीच राजयोगः |
| 22 | श्रीछत्रयोगः | 52 | सुखप्राप्तियोगः |

| | | | |
|---|---|---|---|
| 23 | नगरयोगः | 53 | परोपकारीयोगः |
| 24 | समुद्रयोगः | 54 | कुटुम्बसंरक्षणयोगः |
| 25 | स्फीतयोगः | 55 | लक्षाविशयोगः |
| 26 | पुष्कलयोगः | 56 | सहस्रजनानांपालकयोगः |
| 27 | चतुः सागरयोगः | 57 | कोटिश्वरयोगः |
| 28 | इन्द्रयोगः | 58 | ज्ञातिउपकारकयोगः |
| 29 | नृपयोगः | 59 | राजकीयसविद्याप्राप्तियोगः |
| 30 | विपरीतराजयोगः | | |

**भावफलादेशे विचारणीयविषयानि –**

श्रीमन्त्रेश्वरस्य फलदीपिकायाः ग्रन्थे भावचिन्ताध्याये त्रिशतश्लोकैः विस्तारपूर्वकं वर्णितमस्ति। तद्यथा –

भावाः सर्वे शुभपतियुता वीक्षिता वा शुभेशैः
स्ततद्भावाः सकलफलदाः पापग्रहयोगेहीनाः।
पापाः सर्वे भवनपतपश्चेदिहास्तथैव
खेटैः सर्वैः शुभफलमिदं नीचमूढारिहीनैः।।[1]

अर्थात् यदि भावः शुभग्रहेण स्वस्वामिना शुभभावेषु युतः दृष्टः वा चेत् तथा च पापग्रहैः युतो वा दृष्टे न चेत् तर्हि तेषां भावानां शुभफलं भवति।

भावेशः यदि पापग्रहः अस्ति तदा तस्यभावस्य शुभफलं वृद्धिं प्राप्यते। अत्र अन्य पापग्रहाणां सम्बन्धः शुभफलनाशप्रदः भवति।

**1.भावाधिग्रतग्रहः –**

कस्यामपि कुण्डल्यां लग्नतः द्वादशभावेषु या राशिः सन्ति तासां सवामीग्रहः तस्य भावस्य अधिपतिः भवेत्।

---

1. फलदीपिका – 15/1

**2.भावस्थग्रहः –**

सूर्यादिनवग्रहाः यस्मिन् कसिमन् भावे स्थिताः सन्ति तत् तु तस्मिन् भावस्य भावस्थग्रहः भवति।

**3.भावकारकग्रहः –**

सूर्यादि सप्तग्रहाः भावफलप्रदाने विशिष्ट फलप्रदातः सन्ति। ते भावकारकं स्थिरसंज्ञायां ज्ञायन्ते।

**द्वादशभावकारकचक्रम (स्थिरकारकाः) –**

| **भावाः** | **कारकग्रहाः** |
|---|---|
| 1 | सूर्यः |
| 2 | गुरु |
| 3 | भौमः |
| 4 | चन्द्रः, बुधः |
| 5 | गुरु |
| 6 | शनिः |
| 7 | शुक्रः |
| 8 | शनिः |
| 9 | गुरुः, सूर्यः |
| 10 | शनिः, सूर्यः, बुधः, गुरु |
| 11 | गुरु |
| 12 | शनिः |

**चरकारकग्रहाः –**

कस्यामपि पत्रिकायां सूर्यादीनां राशिविहायांशानुसारेण उत्तरोत्तरन्यून अंशात्मक ग्रहाः चरकारकाः भवन्ति। तद्यथा –

**सर्वाधिक अं**शातमकग्रहः = आत्माकारकग्रहः

**तदन्यून अं**शातमकग्रहः = अमात्यकारकग्रहः

तदनुसारेण क्रमेण भातृकारकः मातृकारकः, पितृकारकः, पुत्रकारकः, ज्ञातकारकः तथा च सर्वाधिकन्यूनांशकारकग्रहः कलत्रकारकः भवति।

**4.भावदृष्टिग्रहः –**

सूर्यादिग्रहाः यस्मिन् कस्मिन् भावोपरि दृष्टिः क्रियते सः तु भावदृष्टिगत ग्रहाः भवति।

**5.भावेशयुतग्रहः –**

यस्यभावस्य स्वामीग्रहेण सह कोऽपि अन्यग्रहः युतोऽस्ति सः भावेशयुतग्रहः कथ्यते। सूर्यादिग्रहाः यदि स्वनीच वा शत्रुराश्यां न चेद् न वा सूर्येणाष्टगतं चेत्। तदा स्वकीयभावस्य शुभफलं वृद्धिं करोति।

**भावफलादेशे मुख्यरूपाणि –**

1. भावाधिपतिः
2. भावस्थग्रहः
3. भावकारकग्रहः
4. भावदृष्टग्रहः
5. भावेशयुत ग्रहः

**यो भावः स्वस्वामिषुशुभैर्युक्तो दृष्टो वा तस्य वृद्धिः पापैर्हानिमिर्श्रमिश्रमः।**

अर्थात् यः भावः भावेशयुक्तोऽस्ति वा शुभग्रहयुक्तो दृष्टः अस्ति तस्य वृद्धिः भवेत्। पापयुक्तो दृष्टो अस्ति तदा तस्य हानिः मिश्रग्रहैः युतदृष्ट स्थितः मिश्रफलं ददाति।

नीचराशिस्थितो ग्रहो भावनाशकः –

**यः भावेशः नीचराशिस्थः शत्रुभावस्य वा भवेत् तस्य भावस्य फलनाशं भवेत्।**

**स्वसुहृदतुङ्गस्थो भाववृद्धिकरः –**

यः भावेशः स्वोच्चराश्यां स्वगृही मित्रक्षेत्रे वा भवेत् तस्य भावस्य वृद्धिः भवेत्।

**यद्भावात्मिके पापास्तद्भावनाशः –**

यस्मात् भावात् 6, 8, 12 (त्रिक्) स्थानेषु पापग्रहाः सन्ति तस्य भावस्य शुभफलनाश्यति।

**यद्भावेशस्त्रिके त्रिकेशो वा यद्भावे तद्भावनाशः –**

यस्य भावस्य भावेशः त्रिक्स्थाने 6, 8, 12 (त्रिक्) स्थानेषु वा यस्मिन् भावे षष्ठेशः, अष्टमेशः, द्वादशेषु स्थितोऽस्ति तस्य भावस्य हानिः भवेत्। यद्भावीयकेन्द्रार्थकोणस्थानानि शुभपतियुतानि तद्भावपुष्टिः पापयुतानि **चेद्धमिमिश्रयुतानि मिश्रम् –**

यस्मात् भावात् केन्द्र वा त्रिकोण 1, 4, 7, 10, 5, 8, स्वस्वामी वा शुभग्रहः अस्ति चेत् तर्हि तस्य वृद्धिः भवेत् पापग्रहः अस्ति चेद् भावहानिः भवेत् मिश्रफलं प्राप्यते।

**यद्भावेशोऽरिनीचाराशिगः शुभैरयुतेक्षितचेतद्भावनाशः –**

यस्य भावस्य स्वामीनीचराशिगत वा शुभग्रहेण अयुक्तः अदृष्टः चेत् तदा तस्यभावस्य हानिः कथ्यते।

**यद्यभावीयरन्ध्रेशस्सूर्यशनिगुलिकंशेषानां मध्योऽधिकबलीतत्फले मूर्तिवित्ता– दिनाशः ।**

यस्मात् भावात् अष्टम् भावे अष्टमेश सूर्य शनि वा गुलिकेशः मध्ये यः ग्रहः बली अस्ति तस्यदशायां देह –धनमादीनां हानिः भवति। यस्मात् भावात् तस्यभावेशः तृतीय– षड्–अष्ट–एकादश–द्वादशतमे भावे स्थितः अस्ति चेत् तत् भावेषशस्य सर्वथा भ्अशुभफलं प्राप्यते अथवा एतेषां भावानां भावेशांः यस्मिन् कस्मिन् भावे स्थिताः सन्ति तस्यापि अशुभफलं प्राप्यते।

**सर्वेग्रहाः नीच–अस्त वा शत्रुराश्यां फलप्रदाने भवन्ति । स्वराशि –मित्रराशि वा स्वमूलत्रिकोणराश्यां पूर्णफलं प्रददाति एवं स्वकीयभावस्य वृद्धिं करोति।**

**सर्वाथचिन्तामणि ग्रन्थेऽपि** फलकथने चिन्तनीय विषयानि वर्णितानि सन्ति। द्वितीय अध्याये श्लोक एकतः षड्पर्यन्तं उपरोक्तनियमाः विहाय

**फलदीपिकाग्रन्थे** भावशुभाशुभचिन्तनध्याये केचन विशिष्टनियमाः कथिताः यत् लग्नाधिपतिः अशुभग्रहः अस्ति चेत् तथापि यस्मिन् भावे स्थितोऽस्ति तस्य वृद्धिं एव करोति। लग्नेशः यदा षष्ठेश –अष्टमेश –द्वादशेषु अस्ति चेत तदपि दुस्स्थानंस्थफलं न ददाति। स्वोच्च मित्रराश्यां अपि षड्बल युक्तो ग्रहः स्वकीय दशान्तरदशायां शुभफलं न दातुमशक्यन्ते। यदि भावसंधौ स्थितः अस्ति चेत।

यः ग्रहः भावस्फूटतुल्यराश्यां स्थितोऽस्ति सः भावस्य पूर्णफलं प्रददाति।[1]

पापग्रहाः पृष्ठिमृतिव्ययसीास्तद्
भाववृद्धिं कल्यन्ति दौषैः।
शुभस्तु तद्भाववलयं हि –
तस्माच्छत्र्वाादिभावोफलप्राणशः।।[2]

श्लोकेऽस्मिन् कथितं यत् त्रिक्स्थानेषु स्थितः पापग्रहः अशुभफलं नष्ट्वा शुभफलं प्रददाति। किन्तु एषु भावेषु (6, 8, 12) एतेषां भावानां अशुभफलवृद्धिं तथा शुीाफलं हानिं करोति।

धर्मे सूर्यः शीतगुर्बन्धुभावे –
शौर्ये भौमः पञ्चमे देवमन्त्र्ाहुरन्ये।
कामेशुक्रश्चाष्टमे भानुपुत्रः
कुर्यातस्य क्लेशमिथ्या।।[3]

नवमे सूर्यः चतुर्थे चन्द्रमा, सप्तमे शनिः षष्टमे भावे सूर्यफलं दातुं समर्था भवन्ति।

लग्नेश यस्मिन्भावे स्थितोऽस्ति तस्य भावस्य फलं प्रददाति तथा च

---

1. फलदीपिका – 15/14
2. फलदीपिका – 15/19
3. फलदीपिका – 15/26

कोऽपि भावेशसहनेयुतिः करोति तस्य भावस्य अपि फलं प्रददाति। यदा सः भावेशः बली अस्ति चेत् तर्हि शुभफलं ददाति अन्यथा अशुभफलं ददाति।[1]

**लग्नबलम् ——**

रुपं मानुषभेऽलिभेऽड.घ्रिरपरेष्वद्धं बलं
तुल्यं स्वभावभिबलेन चोपत्वयगे नाथेऽतिवीर्योत्कटम्।
स्वामीऽयज्ञयुतेक्षिते कवियुते चान्यैरयुक्तेक्षिते
राश्योऽहनि परे वीयान्विताः कीर्तिता ।।[2]

फलादेशकथने सर्वप्रथमलग्नबलं निर्धायते कारणमस्ति जन्मकुण्डल्यां लग्नं अतीव महत्वपूर्णं वर्तते।

---

1. फलदीपिका – 15/27
2. फलदीपिका – 4/6

**ग्रहबलम् ——**

फलादेशकथने सूर्यादिग्रहाणां शुभाशुभफलस्य आधारः तद्ग्रहः कति बलिनो अस्ति तेनोपरि भवति। ग्रहाणां षड्विधप्रकारणानि बलानि फलदीपाकियां –सारावल्यां – जातकपारिजातग्रन्थे –सर्वार्थचिन्तामणि ग्रन्थेऽपि विस्तरेण वर्णितानि सन्ति। **यथा –**

**वीर्यं** षड्विधमाह कालबलं चेष्टाबलं सवोच्चयी
दिग्वीर्यं वयनोद्भवं विषदां स्थानोद्भवं च क्रम।
निश्यारेन्दुसिताः परे दिवि सदा ज्ञः शुक्लपक्षे शुभाः
कृष्णेऽन्ये च निजाब्दमासदिनहोरास्वङ्घ्रिवृद्धया क्रमात्।।[1]

अर्थात् सूर्यादिग्रहाणां षड्प्रकारकानि बलानि फलदीपिकायाम् उपरोक्त श्लोकेन कथितानि सन्ति।

1. कालबलम्
2. चेष्टाबलम्
3. स्वोच्चबलम् /स्थानबलम्
4. दिग्बलम्
5. अयनबलम्
6. नैसर्गिकबलम्

**1.कालबलम् ——**

चन्द्रः–सूर्यः–शुक्रः तथा कुजः निशायाम् बलिनः भवन्ति। सूर्यः– गुरुः – शनिः दिने बलिनः भवन्ति। बुधः सर्वस्मिन्नकाले बली भवति। सर्वे ग्रहाः स्वस्य कालहोरायां स्व–स्व वर्षे स्व–स्व मासे तथा स्वस्य दिने बलिनः भवन्ति। शुक्लपक्षयोः शुभग्रहाः तथा कृष्णपक्षयोः पापग्रहाः शुभाः भवन्ति।

मध्यान्हे सूर्यः –गुरुः –शुक्राणां 1.रूपबलम्, मध्यबलम् रात्रौ शून्यबलं प्राप्नोति।

---

1. फलदीपिका – 4/1

बुधः सदैव रुपबलं प्राप्नोति।

यदा सूर्यः एवं चन्द्रः परस्परं $180^0$ स्यात् तदा शुभग्रहाणां 1 रुपबलं भवति।

सूर्यचन्द्रयोः 0 अंशात्मक युतिकाले शुभग्रहाणां 0 बलं प्राप्यते। अस्मिन्नकाले क्रूरग्रहाणां 1 रुपबलं प्राप्यते।

**2.चेष्टाबलम् ––**

उद्गयने रविशीतमयूखौ वक्रसभागः परिशेषाः।
विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्पयाः।।[1]

उत्रायणे सूर्यचन्द्र बली नास्ति इति वराहमिहिराचार्यस्य मतं किन्तु मन्त्रेश्वरमते चन्द्रग्रहः पूर्णिमायां पूर्णचेष्टाबलं प्राप्यते। किन्तु कल्याणवर्मणः सारावलीग्रन्थे कथ्यते यत् शुक्रः भौमः सूर्यः तथा वृहस्पति उततरायणे बलिनः भवति।

शनिः तथा चन्द्रः दक्षिणायने बलिनौ भवतः। बुधः स्ववर्गे स्थितः सति द्वये अपि अयने बलिनः सन्ति।

युद्धे विजयीग्रहः उत्तरशरे स्थितग्रहः वक्री गतिग्रहः विपुलरश्मिग्रहः तथा च चन्द्रेण सह सभगर्भे भौमादिग्रहाः बलिनः सन्ति।

**3.स्वोच्चजबलम् – सथानबलम् ––**

स्वोच्चत्रिकोणस्वसुहृद्दृगाणराश्यांश
वैशेषिकवर्गवन्तः।
आरोहवीर्याधिकबिन्दुकास्ते
खेचारिणः स्थान बलाधिकाः स्युः।
नीचारिपापखगयोगनिरीक्ष्यमाणास्त –

---

1. बृहद्ज्जातकम् – 2/20

**द्वर्गसन्तिबिन्दुदं**शशंकाश्च ।

**आदित्यर**श्मिपरिभूतपराजितास्ते

**दृ**ष्टयादिशदत्यसहिताश्चयन शोभनाः स्युः।।[1]

**सूर्यादिग्रहाः स्वोच्चरा**श्यांमूलत्रिकोणे मित्रगेहे स्वद्रेष्काणे, स्वगृहे, स्वनवमांशे पारिजातादि वैशेषिकाशे अष्टकवर्गे अधिकबिन्दुयुक्तो तथा आरोहिवीर्यवान् अस्ति तर्हि ते स्थानबलीकथ्यन्ते।

तथा च स्वनीचराश्यां, शत्रुराश्यां, पापग्रहेण युक्त वा दुष्ट पापग्रहाणांवर्गेषु सूर्येणसहास्तगतः अष्टकवर्गे अल्पबिन्दुयुक्तः तथा च दृष्ट्यादि बलहीना अशुभफलदायकाः सन्ति।

स्वोच्चस्वकीयभवनस्वदृगाणहोरा

वारांशवर्गेषु दिनस्य मध्ये।

राशिप्रवेशसमये सुहृदंशकादौ –

मेयूरणे दिनमणिर्बलवानजस्रम्।। [2]

**सूर्यः ––**

स्वकीयोच्चे ($0/10^0$) स्वराशौ, स्वदृगाणे, स्वहोरायाम्, स्ववारे, स्वनवचमांशे, उत्तरायणे, मध्यान्दिन, राश्यादौ, मित्रस्य नवांशादौ लग्नाद् दशमभावे बलवान भवति।

**चन्द्रः ––**

कर्कराशौ –वृषे – स्वदिने –स्वद्रेष्काणे – स्वहोरायाम् –स्वनवमांशे–उत्तरायणे–शुभग्रहावालोकिते–रात्रौ –लग्नात् – चतुर्थे भावे–दक्षिणायने वीर्यवान् भवति।

**भूकुमार ––**

स्ववारे–नवमांशे–स्वदृक्काणे–स्ववर्गे–मीन–वृश्चिककुम्भे–मकर–मेष

---

1. जातकपारिजातः – 2/33–34
2. जातकपारिजातः – 2/61

राशिसु वक्रे दक्षिणदिशि–राश्यादौ च बलाढ्यो भवति। तथा लग्नाद् दशमभावे कर्कराशौ सव्यापि तत्र वर्तमानो जातकस्य सुखं ददाति।

**बुधः ––**

कन्यामिथुनराश्योः निजदिने–स्ववर्गे–धनराशौ रविं बिना (रविवारे बुधो निर्बलं इत्यर्थः) अहर्निशं सौम्यायने (उत्तारयणे ) बलवान भवति।

**वाचस्पतिः ––**

मीनवृश्चिकधनुः कर्कराशौ स्ववर्गस्य स्ववारे, मध्याादिने उत्तरायणे राशिमध्ये (पञ्चं नवांशे) कुम्भराशौ च वीर्यवान भवति।

**दानवेज्यः ––**

लग्ने–चतुर्थे–दशमे च नीचस्थो गुरुः शुभ एव। शुक्रः स्वोच्चे, स्ववर्गे, स्ववारे, राशिमध्ये, लग्नात् 6/12/3/4 भावेषु अपरहणे तथा गृहयुद्धे चन्द्रसंयुक्ते वक्री शुक्रः सूर्यस्यागतो विद्यमानो तदा शुभं भवति।

**छायासुनू ––**

(तरणितनयः) तुलायाम् मकर–कुम्भराशिषु–लग्नात्–सप्तमभावे–याम्यायने स्वदृककाणे, स्वदिने (शनिवासरे) स्वदशायां ग्रहयुद्धे राश्यन्ते तथा यदि कृष्णपक्षे वक्रो भवेतदा समस्तभवने वीर्यवान् भवति।

**असुरः ––**

**मे**ष–वृश्चिक–कुम्भ–कन्या–वृषभ–कर्कराशिषु लग्नात् दशमभावे च बलवान भवति।

**ध्वजः ––**

कन्या–मीनः–वृष–धनराशिषु रात्रौ उत्पातकेतुः जनने च बली स्यात्।[1]

**4.दिग्बलम् ––**

गुर्वेन्दुजौ पूर्वविलग्नसंस्थौ नभस्थलस्थो च दिवाकरौ।
सोरोऽस्तगः शुक्रनिशाकरौ तु जले स्थितावस्यबलौ भवेताम्।।[2]

---

1. जातकपारिजात 2.बृहत्जातकम् – 2/19

अर्थात् पूर्वदिशि कुण्डल्यां लग्ने बुधगुरौ बलवन्तौ भवतः।

उत्तरे कुण्डल्यां चतुर्थे चन्द्रशुक्रौ बलवन्तौ भवतः।

पश्चिमे कुण्डल्यां सप्तमे शनिः दिग्बलं प्राप्यते।

दक्षिणे कुण्डल्यां दशमभावे सूर्यभौमौ बलिनौ भवतः।

**5.नैसर्गिकबलम् ——**

मन्दारसौम्यगुरुशुक्रराश्याङ्कसूर्याः।
नैसर्गिकाख्यबलिनः खेचराः क्रमेण।।[1]

शनिः–भौमः–बुधः–गुरुः–शुक्रः–चन्द्रमा तथा सूर्यः एतेषां सप्तग्रहाणां नैसर्गिकबलम् उत्तरोत्तरमधिकं भवति। अर्थात् शनिः सर्वग्रहतः न्यूनतमः तथा सूर्यः अधिकतमः बलिनो भवति।

सारावल्यां ग्रन्थे सर्वाहृत्यसप्तबलं कथितम्। द्वेष्काण–त्रयांश बलं अपि कथितम्। यथा –

स्त्रीपुंसकाख्याः क्षेत्रेष्वाद्यन्तमध्यराप्राप्ताः।
सूर्यान्निर्गत्य सदा नवोदिता यवनरामतम्।।[2]

---

1. सर्वार्थचिन्तामणिः – 1 / 104
2. सारावली

## 2.ज्योतिषशास्त्रोक्तराजयोगानां समीक्षणम्

ज्योतिषशास्त्रे राजयोगानां विवेचनं विभिन्नग्रन्थेषु प्राप्यन्ते। ये–ये प्रमुख ग्रन्थाः सन्ति तस्य चर्चा कृतं मया। यथा –

**1.बृहज्जातकम् ––**

अस्य ग्रन्थस्य रचना शक् संवत 430 काले अभवत्। त्रिस्कन्धवेत्ता आचार्य वराहमिहिरकृत ग्रन्थोऽपि ज्योर्तिगन्थानां उपजीव्यग्रन्थरूपेण वर्तते। ग्रन्थेऽस्मिन् अष्टाविंशति अध्यायाः सन्ति। तत्र एकादशतमे अध्याये राजयोगानां द्वादशाध्याये नाभसयोगानां एवं त्रयोदशाऽध्याये चन्द्राधियोगानां वर्णनं प्राप्यते।

तत्र राजयोगाध्याये उच्चग्रहैः समृद्धता षड्ग्रहाभिर्वालोकिते द्वाविंशति, द्वाविंशति मिलित्वा चतुर्चत्वारिंशत योगाः वर्णिताः सन्ति। अध्यायेऽस्मिन् अन्येऽपि विशिष्टराजयोगानां वर्णनं  प्राप्यते। सर्वाहत्य तत्र 113 योगाः वर्णिताः सन्ति।

**2.जातकाभरणम् ––**

होराशास्त्रस्य समस्तविषयाणां समावेशः अस्मिन् ग्रनथे कृत्वा श्रीढुण्ढिराजदैवज्ञः रचितः ग्रन्थोऽयं जन्मपत्रिकानिर्माणे अतीव उपयुक्तः ज्योतिर्विद्यानां कृते। ग्रन्थेऽस्मिन् द्विसप्ततिः अध्यायाः सन्ति। राजयोगाध्याये राजयोगानां वर्णनं तेषां प्राप्ति कालः राजयोगानांभड्गः राजयोगः सड्गति सामुद्रिकचिन्हानि वर्णनं अपि कृतमस्ति। परञ्च तत्र पञ्चमहापुरुषराजयोगः अध्यायः, नाभसयोगाध्यायः, सूर्ययोगाध्यायः, चन्द्रयोगाध्यायः, स्त्रीजाकाध्यायेः अपि राजयोगानां वर्णनं प्राप्यते।

**3.बृहत्पाराशरहोराशास्त्रम् ––**

ज्योतिशास्त्रस्य अष्टादश प्रमुख प्रवर्तकेषु अस्य ग्रन्थस्ज्ञय रचयिता पराशरमहर्षिः नामः अग्रगण्यः वर्तते। ज्योतिषशास्त्रे ग्रन्थोऽयं आधारभूतो वर्तते।होराज्योतिषस्य अवान्तरग्रन्थेषु बहुधा तस्यैव मतमनुसृत्य प्रस्तारकृतं

वर्तते। ग्रन्थेऽस्मिन् पूर्वोत्तरभागेन विभागद्वयं वर्तते। पूर्वार्धे एकाने चत्वारिंशत् अध्यायाः सन्ति। तथा च उत्तरार्धे एकोनविंशति अध्यायाः सन्ति। सम्पूर्णग्रन्थे अष्टपञ्चाशताध्यायाः सन्ति। ग्रन्थेऽस्मिन् एकोनविंशति अध्यायतः द्वाविंशति अध्यायर्प्यन्तं लग्न एवं कारकांकुण्डली अपि चिन्तनीया।

चिन्तयेत् कारकांशे वा जनुर्लग्नेऽथ वा द्विजः।
राजयोगकरौ द्वौ द्वौ स्फुटौ खेटौ प्रयत्नतः।।

**4.उत्तरकालामृत ——**

अस्य ग्रन्थस्य रचना महाकविकालिदासेन कृतास्ति। अस्य प्रसिद्धिः दक्षिणभारते अधिका वर्तते। ग्रन्थोऽयं भागद्वयेन विभाजितोऽस्ति। प्रथमकाण्डः, द्वितीयकाण्डाश्च। प्रथमकाण्डे अष्टखण्डेषु ग्रहबलसाधन, आयुर्दायविचारः, जन्मकाललक्षण, ग्रहभावफल, भावकवरकत्व, दशाफल–विचारः एवं मुहूर्तविषयक वर्णनमस्ति।

द्वितीयकाण्डे कर्मकाण्डविचारः, ज्योतिषविषयकविवेचनं कृतमस्ति। तत्र प्रथमकाण्उे ग्रळभावफलनामके चतुर्थेखण्डे विशेषरूपेण राजयोगवर्णनं तेनैव सह विपरीतराजयोगानां वर्णनं द्वाविंशतितमे श्लोके कथितम्।

**5.सारावली ——**

अस्य ग्रन्थस्य रचनाकारः कल्याणवर्मणः पूर्ववर्ती आचार्याणां तथा च यवनाचार्याणांमपि ग्रन्थेभ्यः सारभूत तत्वानि संग्रहीत्वा चतुर्थपञ्चा–शताध्यात्मिका विस्तृता रचनाकतृा। तत्र पञ्चत्रिंशततमे अध्याये 186 श्लोकैः राजयोगानां विस्तृतवर्णनं प्राप्यते। अन्य कोऽपि ग्रन्थे न उपलभ्यते। तथा च सप्तत्रिंशत् तमे अध्यायेऽपि राजयोगानां विषयः उपस्थापितः। तत्र नीचकुलोत्पन्नः राजयोगानां 32 भेदाः वर्णिताः सन्ति। प्रवज्याध्याये नृपसन्यासी योगः अपि वर्णितमस्ति।

**6.जातकपारिजातः ––**

भारद्वाजगोत्रोत्पन्नः श्रीवेंकटेशपण्डितस्य पुत्रेण वैद्यनाथेन ग्रन्थोऽयं लिखितः। अस्य रचना 1482 विक्राब्दे जातः। ग्रन्थकारेण पूर्ववर्ती वशिष्ठ पराशरगर्गचार्याणादीनां ग्रन्थेभ्यः सारतत्वं संग्रहीत्वा अस्य ग्रन्थस्य रचना कृता। ग्रन्थोऽयं ज्योतिषशास्त्रे महत्वपूर्णं वर्तते। तत्र सप्तमे अध्याये 180 श्लोकेषु राजयोगानां वर्णनं प्राप्यते। अध्यायेऽस्मिन् राजयोगानां विविध भेदाः सूर्यादियोगः चन्द्रादियोगः पञ्चमहापुरुषयोगः हरि–हर–ब्रह्मयोगः–लक्ष्मीयोग तथा नाभययोगेषु विवेचनं प्राप्यते।

**7.मानसागरी ––**

अयं स्रग्रहः ग्रन्थः वर्तते। अस्य रचना षोडश शताब्द्यां संजाता। फलादेशकथने ग्रन्थोऽयं विशिष्टरूपेण वर्तते। तत्र नीचस्यग्रहाणां विवेचतिमस्ति। असिमन् ग्रन्थस्य चतुर्थाध्याये राजयोागनां विवेचनं प्राप्यते।

**8-फलदीपिका ––**

सुकुन्तलाम्बादेव्याः भक्ताः नम्बुद्रीब्राह्मणकलोत्पन्नः श्रीमन्त्रेश्वरकृतार्था दीपिकायां षष्ठाध्याये रुचकादिपञ्चममहापुरुषयोगाः लग्नाधियोगाः सूर्यचन्द्रजनितराजयोगाः नाभसयोागाः तथा च ग्रहाणां व्यत्यसम्बन्धेन भवितानां 28 महायोगाः, 8 खलयोगाः तथा च 30 दैव्ययोगाः विशेषरूपेणविर्णताः सन्ति। सप्तमे राजयोगाध्याये 42 राजयोगादीनां वर्णनं तेनैव सह नीचभङ्गराजयोगानां वक्रीग्रहकृत राजयोगानां 'दिग्बलीग्रहकृतराज –योगानां वर्णनं अपि प्राप्यते।

**9.भावार्थरत्नाकरः ––**

अस्य रचना रामानुजाचार्येण कृता। ग्रन्थोऽयं अनुसंधानात्मको अस्ति। अपि च पञ्चदशाध्यायाः सन्ति। नवमे अध्याये राजयोगानां वर्णनं उपलभ्यते। तत्र नवमे अध्याये राजयोगानां वर्णनं उपलभ्यते। तत्र प्रथमाध्यायंमपि मेषादि द्वादशलग्नेषु भवितानां राजयोगानां वर्णनं कृतमस्ति।

**10.भावकुतूहलम् ——**

जीवनाथशर्मा लिखितेऽसिमन् ग्रन्थे सप्तादशाध्यायाः सन्ति। तत्र कतिपय उत्कृष्टराजयोगानां वर्णनं स्त्रीराजयोगानांवर्णनं तथा च राजविनाशकयोगानां वर्णनं अपि सप्तमे—अष्टमे—नवमे अध्याये प्राप्यते।

**11.सर्वार्थचिन्तामणिः ——**


अस्य ग्रन्थस्य रचना शकाब्दः 1315 पश्चात् भारद्वाजगोत्रोत्पन्नः श्री वेंकटेशशर्माद्वारा जाता। ग्रन्थेऽस्मिन् सप्तदशाध्यायाः प्राप्यन्ते। तत्र नवमे अध्याये राजयोगानां विषयः प्राप्यते। तत्र विशेषेण परमनीचराजभङ्ग एवं नीचस्थशुक्रेणराजयोगभङ्गः वर्णित्मस्ति। परञ्च भाग्यहीनयोगः गुरुचाण्डाल —योगादीनां अपि वर्णनं प्राप्यते।

विविधैः लोकैः स्व—स्वग्रन्थेषु अनेकाः राजयोगाः लिखिताः। तत्र लग्नाधारित—चन्द्राधाधारितराजयोगाः वर्णिताः सन्ति। तथापि यस्य जातकस्य जन्मकुण्ड्ल्यां राजयोगानां अवसिितिः भवति अपि च राजपुरुषाः अपि भवन्ति। तथापि राजसुखदीनां अभावः जायन्ते। एतादृशा राजयोगाः राजभङ्गयोगादि नामना प्रसिद्धाः वर्तन्ते। अत्र ज्योतिषशास्त्रे वर्णित राजयोगानां विश्लेषणपूर्वकं उदाहरणानि प्रस्तूयते।

# 3.राजयोगानां विश्लेषणात्मकाध्ययनम्

## 1.अखण्डसाम्राज्यराजयोगः——

### स्व. जगजीवनराम




भूसंरक्षणप्रधानः स्व जगजीवनरामस्य पत्रिकायां अखण्डसाम्राज्ययोगः पूर्णतयः फलीभूतो अस्ति।

अत्र धनेशः नवमेशभौमः चन्द्रतः केन्द्रे अस्ति।


लाभेशे शनिः लग्नकेन्द्र अस्ति।

गुरु पञ्चमभावे उच्चस्थः अस्ति।

**धनेश**ः—नवमेशः—लाभेशः—चन्द्र—लग्नकुण्डल्यां केन्द्रे बली अस्ति। तथा गुरुः अपि उच्चबली पंचमे अस्ति। 'अखण्डसाम्राज्ययोग जातः जगजीवनरामः नीचकुलोत्पन्नः भूत्वाऽपि भारतदेशे सर्वोच्चसत्ता प्राप्तवान्। पद—सम्मान—प्रतिष्ठा—धन—वैभव—सुख—समृद्धिः—कीर्तिश्च।

2.लक्ष्मीयोगः ——

श्री वी.पी.सिंहः





पूर्वप्रधानमन्त्री श्री वी.पी. सिंहस्य जन्मकुण्डल्यां लक्ष्मीयोगः निर्मीयते।

1. अत्र भाग्येशः गुरुः उच्चराशितः केन्द्रे स्थितोऽस्ति।
2. लग्नेशः चन्द्रमाऽपि चतुर्थकेन्द्रे अस्ति, बलवान भवति।
3. चतुर्थस्थाने चन्द्रः दिग्बली भवति।

लक्ष्मीयोगेः जातः श्री वी.पी.सिहमहोदयः श्री–समृद्धिः–पद–प्रतिष्ठा–यश –तथा सर्वोच्चसत्तासुख प्रापतवान तस्य कुण्डल्यां गजकेसरी– योगः अपि पूर्णतया शुभफलप्रदः दृश्यते।

3.चक्रयोगः ——

## डॉ. राजेन्द्रप्रसादः





भारतदेशस्य प्रथमराष्ट्रपतिः डॉ. राजेन्द्रप्रसादस्य जन्मपत्रिकायां चक्रयोग नामको योगः दरीदृश्यते। यथा –

1. राहु दशमस्थाने उच्चस्थः अस्ति।
2. लग्नेश नवमभावे मित्रक्षेत्री अस्ति।
3. दशमेशः बुधः गुरुणाशुभदृष्टिः लग्ने अस्ति।

पूर्णतया घटितः ‘चक्रयोगकारणेन सः भारतवर्षस्य सर्वोच्चसत्ता प्रापतवान सःउच्चसत्ताधीशः अभवत्। अनेन सः राज्य–वैभव–धन–सम्पत्ति –सम्मान–पद–प्रतिष्ठा सर्वं सौख्यं प्राप्तवान।

## 4.काहलयोगः——

### श्रीमुलायमसिंह यादव





भूतपूर्व उत्तरप्रदेशस्य मुख्यमन्त्री श्री मुलायमसिंहस्य जन्मपित्रकायां 'काहलयोगः' पूर्णतया दरीदृश्यते।

1. तत्र चतुर्थेशशुक्रः स्वगृहीभौमेन सह दशमस्थाने केन्द्रे अस्ति।
2. लग्नेश शनिः एवं भाग्येश शुक्रः परस्परतः केन्द्रस्थाने स्तः।
3. भाग्येश—चतुर्थेश भूत्वा योगकारक शुक्रः केन्द्रे अस्ति।
4. परञ्च स्वक्षेत्री शनिः लग्नेशः भूत्वा लग्ने बली अस्ति।

काहलयोगे जातः बलवान, साहसी, धनी,मूर्ख,समृद्ध, पदाधिपतिः, प्रतिष्ठित —ग्रमानाथः अपि अभवत्।

**5.गजकेसरीयोगः —**

## श्रीमती ऐनी बेसेन्ट





भारतीयराष्ट्रीय कांगेस अध्यक्षा श्रीमती ऐनी बेसेन्ट्याः पत्रिकायां 'गजकेसरी' नामको राजयोगः केन्द्रे त्रिकोणाधिपतिभ्यां घटितः।

पञ्चमेश चन्द्रतः लग्नेश गुरुः केन्द्रे युतिपूर्वकं स्यात्।

गजकेसरीयोगे सञ्जातः तेजस्वी, धनधन्ययुक्तः, मेधावी, गुणसम्पन्नः राजप्रियः भवेत्। कुण्डल्यां जातकाः अस्य योगस्य पूर्णफलं प्राप्तवती।

**6.अंशावतारयोगः ——**

**श्री आद्यशङ्कराचार्यः**





जगद्गुरुः श्री आद्यशङ्कराचार्यैः को न जानति ? तेषां कुण्डल्यां गुरु–शुक्र–शनिभिः पूर्णरूपे 'अंशावतारयोगः' निर्मीयते। अपि च कुण्डल्यां हंसयोगाः, शशयोगः, महायोगः अपि अस्ति।

1. पत्रिकायां कर्कलग्नं चरराशेः लग्नं अस्ति।
2. शुक्रः एवं गुरुः केन्द्रे स्तः।
3. शनि स्वोच्चराश्यां तुलायां चतुर्थस्थाने केन्द्रेस्थितोऽस्ति।

अत्र 'अंशावतारयोगस्य' सर्वाणि लक्षणानि घटितानि सन्ति। योगेऽस्मिन् जातः जगद्गुरुः पुण्यात्मा–कालज्ञः युगपुरुषः वेदान्तज्ञ–संयमी –तीर्थटनी तथा राजलक्ष्मी सम्पन्नः चतुर्मठाधीशः आसीत।

**7.कारकयोगः——**

## श्री राजा विक्रमादित्य




भारतवर्षे यस्य प्रसिद्धिः नाम्ना विक्रम संवंत्सरप्रचलितः अस्ति सः परं कीर्तिवान—पराक्रमी—प्रबुद्धः राजा विक्रमादित्याः आसीत्। विक्रमादित्यस्य कुण्ड्ल्यां 'कारकयोगस्य सर्वलक्षणानि प्राप्यते।

यदि जन्मकुण्डल्यां लग्नतः स्वक्षेत्री मूलत्रिकोण—स्वोच्चस्थित्यां बलीग्रहाः केन्द्रस्थानेषु सिथताः सन्ति। तर्हि परस्परकारको नामको प्रबलराजयोगः संजायते। अत्र ——

**1.** भाग्येशु गुरु स्वोच्चराश्यां लग्ने अस्ति।

**2.** योगकारकग्रहः भौमः सप्तमे उच्चस्थः अस्ति।


**3.** धनेश सूर्यः दशमकेन्द्रे सत्तास्थाने उच्चराश्यां अस्ति।

**4.** स्वोच्चराश्यां तुलायां शनिः चतुर्थ केन्द्रे स्थितोऽस्ति।

परस्परकारकयोगः अतीवशुभफलप्रदायको भवति। योगेऽस्मिन् जातः नीचकुलात्पन्नोऽपि प्रधानता याति। राजकुलोत्पन्न अवश्यमेव नरेन्द्रः भवति। योगोऽयं सर्वसौख्यं —शौर्यं —यश—कीर्ति —मान —प्रतिष्ठा —प्रसिद्धिः —समृद्धिः —राज्यसुखादि प्रयच्छन्ति।

**8.महायोगाः ––**

## श्रीमती इन्दिरागांधी





भारतदेशस्य भूतपूर्वमहिलाप्रधानमन्त्री श्रीमती इन्दिरागांधी महोदयायाः पत्रिकायां श्री मन्त्रेशरेण कथितां अष्टाविंशति महायोगेभ्यः द्वै योगाः घटितौ स्तः। तथा दुःस्थानाधिपति परिवर्तनेने विपरीतराजयोगः अपि प्रवर्तते। अत्र

1. **लग्ने**शचन्द्रस्य सप्तमेश शनिना सह राशिपरिर्वतनेन व्यत्ययसम्बन्धेन महायोगः जातः।
2. **योगकारकभौमस्य धने**श सूर्येण सह परिवर्तनेन द्वितीयमहायोगः जातः।
3. षष्ठेश–भाग्येश गुरोः लाभेश शुक्रेण सह परिवर्तनेन विपरीत राजयोगफलीभूतोऽस्ति। सा जीवने सत्ता–महत्ता–धन–वैभव–यानसुख –श्री –समृद्धि –पसिद्धिः राज्यसुखं च प्रापतवती।

## 9.सरस्वती योगः ——

### महात्मागांधी





**रा**ष्ट्रपिता महात्मागांधीमहोदयस्य जन्मपत्रिकायां सरस्वतीमातायाः पूर्ण कृपा वर्तते। तस्य कुण्डल्यां आचार्येण कथितः 'सरस्वती नामको राजयोगः सर्वलक्षणानियुक्तो दृश्यते।

1. यदि पत्रिकायां शुक्र–बुध–गुरु ग्रहाः केन्द्रे वा त्रिकोणे सन्ति चेत् तर्हि सरस्वती योगः भवति। अस्या कुण्डल्यां शुभस्थानानां एवं मित्रक्षेत्री भूत्वा सप्तमे गुरुः स्थितोऽस्ति।

अस्यां कुण्डल्यां लग्नेश–भाग्येशयुतिः अपि भाग्ययोगः क्रियते। परञ्च स्वग्रही शुक्रेण 'मालव्ययोग' अपि जायते। अनेनकारणेन जातकोऽयं त्रिलोके प्रसिद्धिः जातः। सः अतिबुद्धिमान, भाग्यवान, गणित, साहित्य, नाट्यसाहित्य, वेदान्तादीनां निष्णातः। भूत्वा श्रेष्ठराजा द्वारा पूज्यनीया अभवत्।

## 10. पुष्कलयोगः

### श्री एन. टी. रामाराव





राजनेता एवं पसिद्ध अभिनेता श्री एन. टी. रामारावस्य पत्रिकायां 'पुष्कल' नामको राजयोगः घटितः अस्ति।

1. अत्र लग्नेशः शुक्रः सप्तमस्थाने केन्द्रे अस्ति।
2. परञ्च केन्द्रराशीश अपि स्वयं शुक्रः केन्द्रे अस्ति। तथा च
3. शुभग्रहः गुरुणा द्वौऽपि युत दृष्टः स्तः।

'पुष्कलयोगे' जातः रामारावः धनसम्पन्न–प्रसिद्धि–वस्त्र– अलंकार–भूषितः–मृदुभाषी–सर्वोत्तम–प्रभुतायुक्तो नृपतुल्यराजवैभवयुक्तः आसीत् इति सर्वविदितः।

## 11.महाभाग्ययोगः

### श्री राजीवगांधी





भारतवर्षस्य पूर्वप्रधानमंत्री स्व. राजीवगांधी महोदयस्य कुण्डल्यां महाभाग्ययोगः पूर्णतया घटितः जातः। अत्र –

1. अस्य जन्मकालः दिने अस्ति।
2. चन्द्रः विषमराश्यां अस्ति।
3. लग्नेऽपि विषम सिंहराशिगतमस्ति।
4. सूर्यः स्वग्रहीस्थित्यां विषमराश्यामस्ति।

पुरुषजातकस्य दिवाकाले जन्मः चेत् तथा सूर्य–चन्द्रः एवं लग्नः त्रयोऽपि विषमराश्यां चेत् तर्हि तस्य कुण्डल्यां 'महाभाग्ययोगः' जायते। वयं सर्वे जानीमः श्री स्व. राजीवगांधी अनायासं एव राज्यारूढ़ जातः तथा सत्ता–समृद्धिः–य श–कीर्ति सर्वं प्राप्तवान्।

## 12.लग्नाधियोगः ——

### श्री छत्रपति शिवाजी





श्री छत्रपति शिवाजी राज्ञः लग्नकुण्डल्यां तथैव चन्द्रकुण्डल्यां ग्रहस्थिति संयोगेन 'लग्नााधियोगः' एवं चन्द्राधियोगः अपि सञ्जाते।

1. चन्द्रकुण्डल्यां चन्द्रराशितः षष्ठेश गुरु,सप्तमेबुधः तथा अष्टमे शुक्रःएतेषां त्रयाणां स्थितिसंयोगेन चन्द्राधियोगः नामकः राजयोगः निर्मीयते। तथा च –
2. लग्नकुण्डल्यां लग्नतः सप्तमे स्थाने स्वयंलग्नेशसूर्यः एवं गुरोः तथा लग्नतः अष्टमे स्थाने शुक्रस्यस्थितिः लग्नाधियोगः क्रियते। फलस्वरूपे जातकोऽयंअतीव शूरवीरः प्रतापी, साहसी, देशभक्तः, महानभाग्यवान, प्रसिद्धः, स्त्री–पुत्रादि युक्तः तथा शत्रुजितनृप+ बभूव।

## 13.भेरीयोगः

### महारानी एलिजाबेथ





आंग्ल साम्राजस्य महाराज्ञी एलिजाबेथ महोदयायाः कुण्डल्यां भेरीयोगः, रुचकयोगः, कारकयोगः तथा नीचभड्गराजयोगस्य लक्षणानि विद्यते। तत्र ——

1. लग्ने उच्चस्थभौमः अस्ति।
2. लग्नतः द्वितीयभावे गुरुः स्थितोऽस्ति।
3. लग्नतः सप्तमभावे स्वक्षेत्री चन्द्रः अस्ति।
4. लग्नतः द्वादशभावेऽपि केतुग्रहः अस्ति।

अत्र भेरीयोगस्य सर्वाणि लक्षणानि घटितानि सन्ति। अनेन कारणेन सा निरोगी–दीर्घायुः–सदाचारी–सुखी–कार्यकुशला–कुलीना –विख्याता एवं राजवैभवयुक्ताः अभवन्।

**14.पञ्चमहापुरुषयोगः ——**

## श्री अटलबिहारी वाजपेयी





भारतदेशस्य प्रधानमन्त्री श्री अटलविहारी वाजपेयी महोदयस्य जन्मपत्रिकायां 'शशा' नामक पञ्चमहापुरुषयोगः पूर्णफलदायकः अस्ति। कारणं चेत् यदा ——

केन्द्र–त्रिकोणस्थाने, चतुर्थ एवं पञ्चमस्थाने द्वयानां अधिपतिः रूपेण योगाकारक शनिः लग्नकेन्द्र स्वोच्चराश्यां तुलायां विराज्यते। शशयोगे जातः मनुष्यः तीव्रगामी–अतिशूरो –प्रतापी–प्रसिद्ध वनपर्वतासक्तः, मातृभक्तः, बहुविधभाषी, क्षमाशील तथा सेनानायकसदृश, राजवैभवयुकतः भवेत्। जातकोऽयं सप्ततितिवर्षपर्यन्तं राज्यं करोति।

## 15. विपरीतराजयोगः ––

### स्व. श्री मोरारजी देसाई





भारतस्य पूर्वप्रधानमन्त्री स्वर्गीय श्री मोरारजी देसाई महोदयस्य जन्मपत्रिकायां षष्ठमेश–व्ययेशकृतः विपरीतराजयोगः जायते। तथा च चन्द्रतः षष्ठ–सप्तमे स्थाने ग्रहस्थितिपूर्वकेन चन्द्राधियोगः अपि समुत्पद्यन्ते।

1. लग्नकुण्डल्यां षष्ठेशः भौमः अष्टमे दुःखस्थाने स्वोच्चराश्यां मकरे अस्ति।
2. व्ययेशः शुक्रः अपि अष्टमभावे अस्ति।
3. अष्टमभावे भावद्वयस्यााधिपतिः युतिः करोति।
4. परञ्च त्रिकभावे बुधशुक्रयोः उच्चस्थ गुरुः शुभदृष्टिः क्रियते।

   विपरीत राजयोगेजातः मनुष्यः धनी–मानी–सुखी–सत्तायुक्तः, राजयुक्तः नृपः भवेत्।

## 16.मालव्ययोगः

### स्व. संजयगांधी





स्वर्गीय संजयगांधी महोदयस्य पत्रिकायां पञ्चमहापुरुषोक्तः शुक्रेण घटितः 'मालव्य' नामको राजयोगः स्पष्टतः वर्तते।

1. केन्द्र–त्रिकाणाधिपतिः योगकारकग्रहः शुक्रः स्वग्रहीराश्यां दशमे शुभकेन्द्र अस्ति।

अस्य योगस्य फलस्वरूपे जातकः तेजस्वी–गुणी–समृद्ध–उत्साही – शक्तिमान–परस्त्रीरत–स्त्रीपुत्रादियुक्तः–धनी–भोगी–सुख–समृद्ध–वैभवयुक्त भवेत्। अस्यां कुण्डल्यां 'अमलकीर्ति' राजयोगोऽपि विद्यते।

**17.उभयचारीयोगः ——**

## पंडित जवाहरलाल नेहरू





भारतवर्षस्य प्रथमप्रधानमन्त्री श्री जवाहरलाल नेहरू महोदयस्य जन्म –कुण्डल्यां कतिपय राजयोगाः विद्यन्ते। तत्र सूर्यजनिताः वेशि–वशि उभयचारी राजयोगाः अपि विद्यन्ते।

1. सूर्यतः द्वितीये गुरुः वेशियोगः क्रियते।
2. सूर्यतः द्वादशे शुक्रः वाशियोगः क्रियते।
3. सूर्यतः द्वितीये–द्वादशे उभयस्थानयोः ग्रहाः स्थिताः सन्ति तेन कारणेन पूर्ण उभयाचारी राजयोगः सञ्जायते।

फलस्वरूप सः सुखभोग–समृद्ध–यशस्वी–कीर्ति–दाता– राजवैभव–युक्तः–धनी–ज्ञानी–सत्तायुक्तः– बभूवः। परञ्च चन्द्रेण जाताः सुनफाादि –योगकारणेन सुन्दरदेहयुक्त परस्त्रीप्रिय–मतिमान विख्यातः एवं धन–वाहनादिसमस्तसुखयुक्तो अभवन्।

18.दुर्धरायोगः ——

**श्री रामकृष्ण परमहंस जी**





बृहज्जातके ग्रन्थे श्री वराहमिहिराचार्येण त्रयोदशे चन्द्रायोगाध्याये कथिता सुनफा–अनफा–दुर्धरायोगाः अस्या ंकुण्डल्यां स्पष्टतया सञ्जायते। तत्र 31 प्रकारकाः सुनफायोगाः, 31 प्रकारकाः अनफायोगाः तथा च 180 प्रकारकाः दुर्धरायोगाः कथिताः।

1. अस्या कुण्डल्यां चन्द्रलग्ले स्थितो चेत्
2. सूर्यः अपि लग्ने चेत्। अतः सूर्यकुण्डली राशिकुण्डली एवं लग्नकुण्डली एका एव अस्ति।
3. अत्र चन्द्रस्थितः स्थानतः द्वितीये शुक्रः सुनफायोगस्य निर्माणं करोति।
5. चन्द्रतः द्वादशभावे भौमः अनफायोगस्य निर्माणं करोति।
6. चन्द्रतः पूर्वापरस्थानयोः ग्रहस्थितिः कारणेन 'दुर्धरायोगः' सञ्जायते

## 19. नीचभङ्गराजयोगः

### श्री सरदार पटेलः




भारतदेशस्य प्रथमगृहमन्त्री तथा लौहपुरुष सरदारवल्लभभई पटेल महोदयस्य पत्रिकायां विविधराजयोगाः सञ्जायते। तत्र रुचकयोगः, शशयोगः मालव्ययोगः, नामानि त्रय पञ्चमहापुरुष राजयोगाः विद्यन्ते। परञ्च योगकारकग्रहः भौमः एवं सप्तमेशः शनिः द्वयोः युतिः केन्द्र–त्रिकोण –अधिपतिः भूत्वा सप्तमे केन्द्रे राजयोगः क्रियते।

1. अत्र विशिष्टेन धनेशः सूर्यः चतुर्थे तुलाराश्यां नीचस्थः अस्ति।
2. तुलायाः स्वामीग्रहः शुक्रः कुण्डल्यां केन्द्रे स्थितोऽस्ति, सः तु नीचस्थः अस्ति।
3. सूर्यस्य नीचभङ्गराजयोगः सज्जायते। अतः न केवलं सूर्यसय नीचस्थं नाशपतिः किन्तु जातकोऽयं धार्मिक चक्रवर्ती नृपः तथा समस्त राजाभिः वन्दितः भवेत्।

**राजयोगभङ्ग : ——**

नीचस्थस्य पराजितास्त्वरिगताः पापेक्षिताक्रान्त।
युमध्यस्थानगताश्च वक्र विकल स्वर्भानुसंसर्गाः।
भावान्तस्थिखेचराश्च निर्बलाः षष्ठाष्ठरिः पराधिपाः।
केन्द्राधीश्वरः कोपपेश्वरयुतास्तदः योगभङ्गप्रदाः।।

उपरोक्त सर्वेः राजयोगाः **ते**षां ग्रह–राशि–भाव–स्थान–ग्रहयुतिः–ग्रहदृष्टि –भाव–भावेश–भावकारकादि विविधघटकाः शुभाशुभस्थित्यानुसारेण न्यूनाधिकं फलप्रदायकाः भवन्ति। अतः तेषा पूर्णपरिशीलनं कृत्वा फलादेशं कर्तुर्महतिः। कतिपयकुण्डल्यां राजयोगः विद्यमाने सन्ति अपि फलीभूतो न भवन्ति। तर्हि सूक्ष्मविश्लेषणपूर्वकं कारणानि ज्ञनमुर्हति यदि उपरोक्त–

श्लोकानुसारेण ग्रहावस्था चेत् तर्हि राजयोगभङ्गः भवति। यथा तस्य फलं नष्टं भवति।


1. ग्रहः नीचराशि स्थः चेत् वक्री अपि न चेत्।
2. युद्धे पराजितः चेत्।
3. ग्रहः शत्रुक्षेत्री चेत्। शुभग्रहेण दृष्टेऽपि न चेत्।
4. ग्रहः पापयुक्त–पापदृष्टः चेत्।
5. ग्रहः अन्यवक्रीग्रहयुक्तः राहुयुक्तः भवति। वा अस्तंगतं चेत्।
6. भावसन्धि वा राशिसन्धिस्थितः भवति।
7. वर्गेषु नीचस्थ–शत्रुक्षेत्री पापपीडितः भवति।
8. दुःखस्थाने वा त्रिकस्थानाधिपतियुक्तः भवति।

तर्हि एतादृशाः ग्रहाः राजयोगफलप्रदाने अनिष्टाः सन्ति। तैः कारणैः जातकः राजयोगस्य कथितं पूर्णफलं न प्राप्नोति। शुभाशुभत्वविवेकपूर्वकं फलादेशः कर्तुमर्हति दैवज्ञैः इति।

————————————————————————————————

1. उत्तराकालामृत–4/2

## एडोल्फ हिटलर




जर्मन नाझीपार्टी नेता एडोल्फ हिटलर कतिपय राजयोगानां लक्षणानि घटितानि सन्ति। यथा रुचकयोगः केन्द्रत्रिकोणराजयोगः, बुधादित्ययोगः, गजकेसरीयोगः इत्यादि सन्ति। किन्तु एतेषां योगानां घटकग्रहाः निम्नलिखित ग्रहस्थितकारणेन जातकोऽयं अन्ततः राजयोगभङ्ग –कारकाः अभवन्। तेन कारणेन जातकोऽयं अन्ततः निष्फलो, दुखी भूत्वा विनाशं प्राप्तवान्।

धनेशलग्नः सप्तमेभावे शुक्रेण पराजितो जातः।

रुचकयोगभङ्गो जातः।

दशमेस्थितः योगकारकग्रहशनिः शत्रुक्षेत्री अस्ति।

दशमेश चन्द्रस्य षष्ठेश गुरुणायुतिः कार्यबाधा क्रियते। तेन कारणेन गजकेसरीयोगः सञ्जायते।

दशमेशकेतुना सह पापयुक्तो पीडितः। बुधादित्ययोगो जातः।

भाग्येश बुधः षष्ठेश गुरुणा दृष्टोऽस्ति। तेन कारणेन बुधादित्ययोगो भङ्गः जातः।

श्राहो पापदृष्टि लग्नोपरि, दशमेश चन्द्रोपरि अस्ति तेन कारणेन राहुदशायां तस्य पतन–पराजय–विनाशः च अभवत्।

# 4.राजयोगानां विषये विविधमतानां विश्लेषणम्

ज्योतिषशास्त्रे अनेके योगाः सन्ति। योगस्य अर्थः प्रर्वूमेव लिखितं वर्तते। योगस्य निर्माणं अनेकविधरूपेण भवति। यथा – यदा कोऽपि ग्रहः केनापि भावेन राशिद्वारा वा विशेषरूपेण सम्बन्धः करोति तदा योगस्य निर्माणं भवति। किन्तु यस्मिन् योगे यस्य जातकस्य जन्मः भवति यस्मिञ्च योगे जातकः राजा भवति सैव योगः राजयोगानां विशेषरूपेण महत्वं वर्तते। अत्र राजयोगानां विशेलेष्णात्मकं विश्लेषणं क्रियते।

विश्लेषणशब्दस्य अर्थः पृथक भवति, पृथक् करणम्। 'वि' उपसर्गपूर्वात् 'श्लिष' धातोः वि+श्लिष+अन् इति विश्लेषण शब्दः निष्पद्यते। यस्य अर्थः विशेषरूपेण पृथकभावः।

अत्र राजयोगानां विश्लेषणं यदा क्रियते तदा अनेके राजयोगाः भवन्ति। यथा पराशरमहर्षिभिः लिखितं यत् स्वोच्चग्रहैः राजयोगनिर्माणे विशिष्टः सहयोगः भवति। परञ्च जातकपारिजाते फलदीपिकायां देवकेरल इत्याहद ग्रन्थेषु नीचभङ्गराजयोगानां वर्णनं प्राप्यते। अत्र राजयोगानां विश्लेषणं प्रस्तूयते तद्यथा ––

1. नीचभङ्गराजयोगः।
2. केन्द्रत्रिकोणादि भावेशद्वारा राजयोगः।
3. पञ्चमहापुरुषयोगः।
4. महायोगः।
5. विपरीतराजयोगः।
6. अधिराजयोगः।
7. सुनफा–अनफा–दुर्धराराजयोगः।
8. वेशि–वाशि उभयचारीराजयोगः

ज्योतिषशास्त्रे प्रकारान्तरेण राजयोगस्य विशिष्ट अपरनामानि अपि प्राप्तानि भवन्ति। यथा –

| क्रम | राजयोगस्यनामानि | क्रम | राजयोगस्यनामानि |
|---|---|---|---|
| 1 | इन्द्रतुल्यराजयोगः | 2 | निराकुलराजयोगः |
| 3 | नगरराजयोगः | 4 | काहलराजयोगः |
| 5 | त्रिभुवनाधिपतिराजयोगः | 6 | अभिजीतराजयोगः |
| 7 | राजाधिराजराजयोगः | 8 | सार्वर्भामराजयोगः |
| 9 | शत्रुमारकराजयोगः | 10 | अमलकीर्तिराजयोगः |
| 11 | अखण्डराजयोगः | 12 | लग्नाधियोगः |
| 13 | महाभाग्यराजयोगः | 14 | गजकेसरीयोगः |
| 15 | भेरीराजयोगः | 16 | अमलायोगः |
| 17 | श्रीनाथयोगः | 18 | लक्ष्मीयोगः |
| 19 | सरस्वतीयोगः | 20 | मालव्ययोगः |
| 21 | पुष्कलयोगः | 22 | कारकयोगः |
| 23 | पर्वतयोगः | 24 | लग्नयोगः |
| 25 | नृपयोगः | | |

प्रकारन्तरेण नाभसयोगेन सह राजयोगः भवति।

विविधज्योतिषग्रन्थेषु राजयोगानां विवेचनं प्राप्यते।

**पञ्चमहापुरुषराजयोगाः –**

भौमादि पञ्चताराग्रहाणां स्वगृह स्वोच्चस्थितिवशाद भवितानां रुचकादि भद–हंस–मालव्य–राजयोगानां होराष्शास्त्रोक्त राजयोगेष विशिष्टस्थानं वर्तते। रुचकादि पञ्चमहापुरुषराजयोगेषु जातानां मनुष्याणां भौमादि योगकारक –ग्रहानुसारेण एवं विशिष्टशुभचिन्हानि युक्तः देहाकृतिः एवं विशिष्टगुण–ा युक्तस्वभावं वर्तते। सः मालवयादिप्रदेशाधिपतिः एवं दीर्घायु भवेत्। अत्र मया एतेषां योगविषये विविधचार्याणाम् मतं उद्धृत्यते।

**श्री पराशरमहर्षि** स्वकीये बहुत्पाराशरहोराशास्त्रे 'पञ्चमहापुरुष–लक्षणाध्याय नामके सप्तसप्ततिमो अध्याये द्वाविंशतिश्लोकैः रुचक–भद ॒–

हंस–मालव्य– शशनामक राजयोगे जातानां मनुष्याणां विस्तरेण वर्णनम् कृतमस्ति। यथा –

अथ वक्ष्यामहं पञ्च–महापुरुषलक्षणम्।
स्वभोच्चगतकेन्द्र स्थैबलिभिश्च कुजादिभिः।।
क्रमशो रुचको भद्रो हंसो मालव्य एव च।
शश्वश्चेते बुधैः सर्वैमहान्तः पुरुषाः स्मताः।[1]

अत्र तु भौमादि पञ्चताराग्रहाः बलीभूत्वा लग्नात् केन्द्रे स्वक्षेत्री वा स्वोच्चराश्यां भवितुमर्हति इति आचार्यस्य मतम्। तत्र न कोऽपि अन्यग्रहाणां प्रभावं विचारणीयः ।

**श्री मन्त्रेश्वराचार्येण –**

फलदीपिकाग्रनथे राजयोगभेदाध्याये चतुर्थे श्लोकेन एते पञ्चमहापुरुष–योगाः लग्नतः वा चन्द्रतः अपि भौमादि ताराग्रह केन्द्रस्थित्यां भवितुं शक्यते इति कथितम्। यथा –

लग्नेन्द्रोरपि योगपञ्चकामिदं साम्राज्यसिद्धिप्रदं।
तेष्वेकादिषु भाग्यवान् नृपसमो राजा नृपेन्द्रोऽधिकः।।[1]

श्रीमन्त्रेश्वरमते यदि जन्मकुण्डल्यां लग्नात् वा चन्द्रादपि योगपञ्चममिदं साम्राज्यसिद्धिपद्रं भवन्ति।

**श्रीवैद्यनाथमते –**

मूलत्रिकोणनिजतुङ्गग्रहोपयाता
भौमइजीवसितभानुसुता बलिष्ठा।
केन्द्रस्थिता यदि तदा रुचभद्रहंस –
मालव्यचारुशशयोग करा भवन्ति।।[3]

---

1. बृ.पा.हो. 77/1–2
2. फल. – 6/8
3. जातकपारिजातः –7/59

अत्र लग्नतः बलिष्ठ भौमादिग्रहाः स्वराश्यां स्वोच्चराश्यां वा विशेषेण स्वमूलत्रिकोणराश्यां भूत्वा केन्द्रे स्थिताः सन्ति तर्हि रुचकादि योगानां संरचना कथितम्।

**मानसागरीग्रन्थकारमते –**

पञ्चमहापुरुषयोगानां विषये एकविंशतितत्वं एतेषां योगविषये कथितम्–

केन्द्रोच्चगा यद्यपि भूसुताद्या मार्तण्डशीतांशयुता भवन्ति।
कुर्वन्ति नोर्वीपतिमात्मपाके यच्छन्ति ते ाकेवलसत्फलानि।।[1]

अर्थात् भौमादि पञ्चताराग्रहाः केन्द्रे स्वोच–स्वक्षेत्रराश्यां सन्ति चेत्

परञ्च चन्द्रेण वा सूर्येण युक्ता सन्ति तर्हि एते योगाः न भवन्ति राजयोग– कारककारकाः। केवलं तत् ग्रहदशाकाले शुभफलप्राप्ति भवति। तेन मतेन अस्यां स्थित्यां राजयोगानां भङ्गः भवति।

**लक्ष्मीयोगः –**

**श्रीपराशराचार्य मते** लक्ष्मीयोगः बलिष्ठः लग्नाधिपतिः एवं भाग्येश स्वक्षेत्री स्वोच्चराश्यां वा मूलत्रिकोणराश्यां केन्द्रे स्थितो चेत् तर्हि सञ्जायते।

केन्द्र मूलत्रिकोणस्थे भाग्येशे वा स्वभोच्चगे।
लग्नाधिपे बलाढ्ये च लक्ष्मीयोगः प्रक्रीर्त्यते।।[2]

प्रायः शुक्रः लक्ष्मी–धन–समृद्धिकारको ग्रहः कथ्यते। किन्तु अत्र योगेऽस्मिन् आचार्येण शुक्रस्य उल्लेखं न कृतम्।

श्रीमन्त्रेश्वराचार्येण फलदीपिकायां लक्ष्मीयोग वर्णने शुक्रः एवं भाग्येशः द्वावपि ग्रहौ स्वग्रही वा स्वोच्चराश्यां लग्नतः केन्द्र वा त्रिकोणस्थानेषु स्थितौ स्तः। तर्हि लक्ष्मीयोगः भवेत् इति कथितम्।

स्वोच्चे यदि कोणकण्टकयुतौ भाग्येशशुक्रावुभौ।
लक्ष्मीयाख्योऽथ तथाविधे हिमकरे गौश्रीति जीवक्षिते।।[3]

---

1. जातक. – 4/19  2. बृ.पा.हो. –37/3  **3.** फल. – 6/21

**श्रीपद्नाभाचार्येण –**

स्वकीय जातकादेशमार्गग्रन्थे लक्ष्मीयोगः द्विधा कथितम्। यथा –

परमोच्चगतकेन्द्रे भाग्यनाथे शुभेक्षिते।
लग्नाधिपे बलाढये तु लक्ष्मीयोग इतीरितः।।
वर्गोत्तमे गते शुक्रे भग्ये तस्मिन् शुभग्रहे।
उच्चग्रहे तृतीयस्थे लक्ष्मीयोग इतीरितः।।[3]

प्रथमप्रकारे लक्ष्मीयोगरचनायां अन्याचार्यानुसारेणैव वर्णितम् यत् – भाग्येश परमोच्चराश्यां केन्दे शुभदृष्ट्यां स्थितो चेत् एवं लग्नेश बलिष्ठ चेत् तर्हि लक्ष्मीयोगः सञ्जायते।

**काहलयोगः** –

श्रीपराशरमते काहलयोगः कथितं यत् –

सुखेशेज्यौ मिथः केन्द्रगतौ बलिनि लग्नये।
काहलो वा स्वभोच्चस्थे सुखेशे कर्मपान्विते।।
ओजस्वी साहसी धूर्तश्चुरङ्गबलान्वतः।
यर्तिकिच्चद् गामनाथश्च काहले जायते नरः।।[2]

श्री पराशराचार्यस्य प्रमुखराजयोगकारकसिद्धान्तः अत्र दरीदृश्यते। परच्च गुरोः महत्वमपि कथितं अस्य योगस्य संरचनायाम्।

1. यदि चतुर्थेश एवं गुरुग्रहः परस्परं केन्द्रे स्तः तथा लग्नेश बलयुक्तोऽस्ति।
2. सुखेश एवं कर्मेश ग्रहयोः युतिः कर्मेशस्थ स्व वा उच्चराश्यां स्तः तर्हि अपि काहलयोगः सञ्जायते। योगेऽस्मिन् जातः मनुष्यः ओजस्वी साहसी, धूर्तः, चतुरः, बलान्वितः तथा ग्रामाधिपतिः भवेत्।

---

1. जातकदेशमार्गः – 8 / 67–68
2. बृ.पारा. –39 / 9–10
3. जातक. – 7 / 130

**श्री वैद्यनाथमतेन –**

काहलयोगः किञ्चत भिन्नतया सम्भाव्यते। तत्र –

1. चतुर्थेश एवं भाग्येश द्वयग्रहौ परस्परतः केन्द्रे स्थितौ स्तः तथ लग्नेश बलिष्ठ चेत् वा।
2. चतुर्थेश स्वराश्यां वा उच्चराश्यां कर्मेशग्रहेण युतो वा दृष्टोऽपि चेत् तर्हि काहलयोगः भवेत्।

अन्योन्यकेन्द्रगृहणौ गुरुबन्धुनाथौ,<br>
लग्नाधिपे बलयुते यदि काहलयोगः स्यात्।<br>
कर्मेश्वरेण सहिते तु विलोकिते वा<br>
स्वोच्चराशिः सुखपतो यदि तादृशः स्यात्।।[1]

अस्य योगस्य फलं श्री पराशरमतानुसारेणैव कथितम् आचार्येणऽपि।

**श्रीमन्त्रेश्वरमतानुसारेण –**

काहलयोगोऽयं किञ्चित विशिष्टसंयोगेन सञ्जायते इति कथितम्। यथा

लग्नाधिपातभपतिस्थितराशिनाथः<br>
स्वोच्चस्वभेषु यदि कोणचतुष्टयस्थ।<br>
योगः स काहल इति प्रथितोऽथ ताद्वत्<br>
लग्नाधिप्राप्तभपति यदि पर्वताख्यः।।[2]

अत्र तु आचार्यमते लग्नेशस्य भाग्येशग्रहः तस्य राश्याधिपतिः योककारैका भवतः। यदि –लग्नाधिपति राश्येशभाग्येश राश्येश स्थितो चेत् तस्याः राशेः स्वामीग्रहः यदि स्वोच्चराश्यां वा स्वक्षेत्रराश्यां केन्द्र वा त्रिकोणभावे अस्ति तर्हि काहलयोगः सञ्जायते। उदाहरणतया यदि कुण्डलयां धनुर्लग्नं चेत् तर्हि लग्नेश गुरुः भवति। यदि गुरु मेषराश्यां अस्ति तर्हि तस्य राशिनाथः भौमः भेवत्। यदि भौम मिथुनराश्यां चेत् तर्हि तस्य स्वामी बुधः


---

1. जातक. – 7/130
2. फलदीपिका – 6/35

भवेत्। एषः बुधः यदि स्वोच्चराश्यां केन्द्रत्रिकोणे अस्ति तर्हि अर्थात् – लग्नेशस्य राशिस्य राशिपतिग्रहस्य राशिनाग्रहः यदि लग्नकेन्द्रे वा त्रिकोणे स्वक्षेत्री वा उच्चस्थ चेत् तर्हि योगोऽयं काहलयोगं कथ्यते।

1. अत्र धनुलग्नाधिपति गुरु मेषराश्या अस्ति।
2. मेषराशे स्वामी भौमः मिथुनराश्यां अस्ति।
3. मिथुनराशे स्वामी बुधः स्वोच्चकन्याराश्यां दशमकेन्द्रे अस्ति अतः काहलयोगः भवति।

**काहलयोगः**




**चन्द्रार्कनाडी ज्योतिषग्रन्थे –**

राज्यस्थानाधिमध्ये भौमे स्वोच्चे वर्गोत्तमांशगे।
भाग्यनाथेन संयुक्तो योगः काहलसंज्ञकः।।[1]

---

1. चन्द्र. – पृ.–176

अर्थात् यदि वर्गोत्तमी दशमेश ग्रहः भौमः स्वोच्चराश्यां नवमेशसंयुक्तो केन्द्रे अस्ति तर्हि काहलयोगः सम्भाव्यते। अत्र केवल कर्कलग्नं एकमेव लग्नं अस्ति यस्य दशमेश उच्चसभिूत्वा केन्द्रे अस्ति। कारकमस्ति एकमेव भौमसय उच्चराशि मकरः सप्तमे केन्द्रस्थित्याः भवितुमर्हतिः। अन्य ग्रहस्य न। तत्र नवमेशः ग्रहः गुरुः भवति। अतः कर्कलग्ने दशमेशभौमः नवमेशगुरुणा सह स्वोच्चराश्यां मकरे सप्तमस्थाने अस्ति तर्हि काहलयोगः सज्जायते।

ग्रन्थेऽस्मिन् अस्य योगस्य चर्चा कृतास्ति। तद्यथा ——

काहले सहसो कोषी सिथरचितः प्रतापवान्।
चतुरङ्गबलोत्साही युद्धेऽमितपराक्रमः।।
काहलं यौव्ने सौख्यं कौमारे त्वलपसौख्यकृत।
बाल्ये दारिद्रयमापन्नः सत्कलाप्रियो भवेत्।।[1]

अर्थात् काहलयोगे जातः मनुष्यः साहसी, धनवान, धैर्ययुकतः, प्रतापवान, सेनायुकत, बलिष्ठः, उतसाही, तथा युद्धे अपूर्व पराक्रमी भवेत्।

जातकोऽयं बाल्यकाले निर्धनः कौमार्ये अल्प सुखयुक्तः तथा यौव्नकाले अतिसुखसम्पन्नः भवेत्। तथा सः साध्वी भार्याप्रियो भवति।

**महाभाग्ययोगः –**

राजयोगानां प्रकारेषु योगोऽयं विशिष्टप्रकारको भवति। तत्र न कोऽपि ग्रह स्वोच्च वर्गोत्तमी राश्यां भवितुमर्हति न वा केन्द्रत्रिकोणस्थानेषु आवश्यकः। तत्र तु केन्द्राधिपः त्रिकोणाधिपत्यं आवश्यकम्। अत्र तु केवलं सूर्य–चन्द्र–लग्नेश एवं जन्मकालः महत्वपूर्णं वर्तते। यथा कथितं श्री मन्त्रेश्वरेण फलदीपिकायाम् ——

ओजोश्वकेन्दुलग्नन्यजनि दिवि पुमांञ्जेन्महाभाग्ययोगः।
स्त्रीणान्तदव्यत्यये स्याच्छशिनि सुरगुरोः केन्द्रगे केसरीति।।[2]

————————————————————————————————————

1. चन्द्र. पृ.–177
2. फल. – 6/3

**श्रीमन्त्रेश्वरेणानुसारेण यदि –**

पुरुषजातकस्य जन्मकुण्डल्यां यदि लग्नविषमराश्यां अर्थात् मेष, मिथुन, सिंह, तुला, धनु, मकरराशेः चेत् ।

सूर्यः अपि लग्नकुण्डल्यां विषमराश्यां चेत्।

चन्द्रः अपि विषमराश्यां स्थितो चेत्। तथा दिवकाले जन्म इष्टकाले चेत् तर्हि महाभाग्ययोगः सञ्जायते।

स्त्रीणां जन्म यदि रात्रिकाले चेत् सूर्य, चन्द्र, लग्न, त्रयैव समराशेः वृषराशे कर्क, कन्या, वृश्चिक, मकरः, मीनः राश्यां चेत् तर्हि स्त्रीकुण्डल्यां महाभाग्ययोगो जायते।

फलस्वरूपे सः जातकः नयनप्रियः, उदार, वाक्पटुः, विख्यातराजा अथवा राजतुल्यवैभवशाली भवेत्।

कन्यायाः कुण्डल्याः अस्य योगस्य फलस्वरूपे सा सुखी, सुचरित्रा, धनी एवं दीर्घायुपतिः पुत्रादि यक्ताः भवेत्।

श्रीपद्मनाभाचार्यमते –

अस्मिन् योगे जातः सूर्यः, चन्द्रः, लग्नानां न तु राशिस्थितिः ग्राहयाः अपि तु तेषां स्त्री–पुरुष नक्षत्रस्थितिः ग्राहयाः भवति। यथा –

पुननक्षत्रे दिवापुंसा पुंभे लग्नांक चन्द्रभे।
महाभाग्य इति स्यातो योगः स्त्रीणां विपयर्यः।।
महाभाग्ये भवेजजातो नृपवतीष्टसमृद्धिमान्।
सुतसौख्ययुतो भोगी दीर्घायुः पण्डितो भवेत्।।[1]

———————————————————————————————————

1. जातकादेश – 8/17–18

श्रीमती इन्दिरागांधी, उमीााारती, लतामंगेशकर, तथा स्व. राजीवगांधी कुण्डल्यां पूर्णतया महाभाग्ययोगः समुत्पद्यते।

**केमद्रुमयोगः –**

जातकस्य कुण्डल्यां राजयोगविषये विचार्यते तदा एतेषु राजयोागनां भङ्गः कदा भवति कदा तेषां शुभफलं जातकस्य जीवने न प्राप्यते तत्सर्वं चन्तिनीयं अतीव महत्वपूर्णं जातम्। अत एव राजयोगभङ्गकारकाः कतिपययोगानां विश्लेषणमपि महत्वपूर्णम्। अत्र चन्द्रजनित केमुद्रुम नामकयोगः प्रबलाशुभफलदायको प्राप्यते विद्वदिभिः।

यदि कुण्डल्यां केमद्रमयोगः सज्जायते तर्हि तस्य भङ्गकारकयोगः सज्जायते न वा ? योगोऽयं कति हानिकारको विद्यते तत्सर्वं विचारणीयम्।

श्रीपराशरमतेन –

जन्मकुण्उल्यां भवितानां अन्ययोगापेक्षया चन्द्रजन्ययोगाः अन्य सर्वयोागनां शुभाशुभफल दृष्टवा स्वकीयफलं निश्चयेन प्रददाति जातकाय। अतः दैवः यत्नपूर्वकं सर्वप्रथमं एतान् चन्द्रजनितयोगान् चिन्तनीया।

अन्ययोगफलं हन्ति चन्द्रयोगो विशेषतः।
स्वफलं प्रददाति बुधौ यत्नाद् विचिन्येत्।।[1]

यदि जन्मकुण्डल्यां कोऽपि –

1. चन्द्रस्थितभावतः द्वितीय वा द्वादशभावे सूर्यविहाय ग्रहः न।
2. चन्द्रेण सह अपि कोऽपि ग्रहः युक्तः ना चेत् अथवा
3. लग्नस्थानात् केन्द्रे चन्द्र विहाय कोऽपि ग्रह ना चेत् तर्हि केमद्रुमयोगः भवति। योगेऽस्मिन् जातः मनुष्यः अतिनिन्दनीयः विद्या–बुद्धिहीनः आपत्तियुक्तः तथा दरिद्रो भवति।

---

1. बृहत्.– 38/13

**वैद्यनाथमतेन –**

लग्नातस्थिते हिमकरे यदि वा मदस्थे
केमद्रुमो भवति जीवदशा विद्वानो।
चन्द्रे पापयुते तु पापभवने पापांशके वा निशि
व्योमेशेन निरीक्षिते गतबले केमद्रुम योगो भवेत्।।[1]

**केमद्रुमयोगापवादः –**

निशाकरे केन्द्रगते भृगो वा जीवेक्षिते नैव दरिद्रयोगः।
शुभान्विते वा शुभमध्यगेन्द्रो जीवेक्षिते नैव दरिद्रयोगः।।[2]

यदि लग्न अविा सप्तमभावे गु+णा अदृष्टः चन्द्रमा स्थितो चेत् तर्हि केमद्रुमयोगः जायते।

यदि सुनफा –अनफा–दुर्धरायोग न पर्वतन्ते तदा केमद्रुमयोग भवेत्।

यदि निशाकाले जन्मस्यात् तथा क्षीणचन्द्रमा पापगहेण युतः स्यात् पापग्रहस्य नवांशगतः स्थान वा पापग्रहराश्यां स्यात् तर्हि अपि केमद्रुम योग सञ्जायते।

परन्तु यदि

चन्द्रकेन्द्रे स्थितो चेत् तथा शुक्रेण वा गुरुणा दृष्ट स्यात् वा चन्द्रशुभग्रहयुतो स्यात् तर्हि केमद्रुमयोगः न भवेत्।

**श्रीमहर्षिजैमिनि मते –**

स्वपितृपदाद् भाग्यरोगयोः पापे साम्ये केमद्रुमः।[3]
चन्द्रदृष्टौ विशेषेण।[4]

---

1. जातक. – 6/79
2. जातक – 6/ 71
3. अ.–1, पाद–2/111
4. अ.–1, पाद–2/121

सर्वेषां चैवं पाके।[1]
स्वांशालग्नात् पदाद वाऽपि द्वितीयाष्टमाभवयोः।
सर्वेषां पापसाम्ये चन्द्रदृष्टौ विशेषताः।। [2]

**महर्षिजैमिनिमते –**

यदि कारकांशलग्नतः जन्मलग्नतः वा आरुढ़लग्नतः यदि द्वितीय–अष्टमभावयोः तुल्यसंज्ञाका पापग्रहाः सन्ति तर्हि केमुद्रुमयोगः भवेत्।

श्री मन्त्रेश्वराचार्य मते –

फलदीपिकाग्रन्थे केमद्रुमविषये लिखितं यत् –

विधोस्तु सुनफाानफाधुरधराः स्वरिफोभय
सिथतैर्विराविभिर्गहैरितरथा तु केमद्रमः।
हिमत्वापि चतुष्टये ग्रहयुतेऽथ केमद्रुमो
न हीति कथितोऽथवा हिमकरादग्रहैः केन्द्रगैः।।[3]

यदि चन्द्रस्थितःभावतः द्वितीये–द्वादशे भौमादि पञ्चग्रहेभ्यः कोऽपि केन्द्रे स्थिते सति सुनफा–अनफा–दुर्धरायोगा– भवन्ति –

यदि उपरोक्त तत्रैव योगानां अभावे चन्द्रतः द्वयोः पार्श्वयोः ग्रहस्थित्याभावे केमद्रुमयोगः भवति।


यदि चन्द्रमा केन्द्रे स्थितो चेत् वा ।

चन्द्रतः केन्द्रे –दशमे स्थाने ग्रहभभावे केमद्रुमयोग भवेत्।

---

1. अ.–1, पाद–2 / 121
2. बृहत.पारा. – 34 / 94
3. फल. – 6 / 5

## केमद्रुमभङ्गयोगः




अस्यां कुण्डल्यां चन्द्रतः द्वितीये–द्वादशे भावे कोऽपि ग्रहेणयुक्तः नास्ति।

चन्द्रः कोऽपि ग्रहेणसह युक्तः नास्ति।

किन्तु चन्द्रः स्वयं केन्द्रे स्थितो अस्ति।

तथा चन्द्रतः लग्नतः चतुर्थे एवं दामेभावे गुरु–शुक्र–शनि ग्रहाः स्थिताः सन्ति अतः केमद्रुयोगः भङ्गः भवेत्।

**श्रीवराहमिहिराचार्येण मते –**

केमद्रुमयोगविषये श्रीवराहमिहिरारचार्यस्य मतं महत्वपूर्णमस्ति। स्वकीय बृहतज्जातकग्रन्थे चन्द्रायोगाध्याये तत्र तृतीये श्लोके अन्येषां मतानिऽपि नेष्यते।

हित्वार्क सुनफानफादुरुधराः स्यान्तयोभस्थैग्रहैः।
शीतांशो कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्ववसौ।

केन्द्रे शीतकरेऽथवा ग्रहयुते केमद्रमो नेष्यते।
केचित्केन्द्रनवांशकेषु च वदन्त्युक्ति प्रसिद्धा न ते।।[1]

यदि जन्मकुण्डल्यां सुनफा–अनफा–दुरुधरायोगाः न स्युः तर्हि केमद्रुमयोगः जायते इति सर्वमान्यमतम्।

जीववर्मामतानुसारेण यदि लग्नतः केन्द्रे स्थाने चन्द्रमा अस्ति चेत् वा भौमादिग्रहेण युक्तः स्यात् तर्हि अपि केमद्रुमयोगः भवेत्।

श्रीगर्गाचार्यमतेनऽपि चन्द्रतः केन्द्रे भौमादीनां केमद्रुम नेष्यते।

श्रीश्रुतिकीर्तिजी मते चन्द्रातचतुर्थे सुनफा दशमस्थितैः कीर्तितोऽनफा विहगैः इति केमुद्रुमभङ्गकारकाः ।

भगवानगार्गेऽपि चन्द्र यदि लग्नात् केन्द्रगतोऽस्ति तर्हि केमद्रुमभङ्गयोगः भवति।

श्रीकल्याणवर्मणा मते –

उपरोक्तायोगात्रयीाावे केमद्रुमयोगः भवेत्। किन्तु सारावल्यां केमद्रुमस्य भङ्गमपि कथितम्। यथा –

एते न कदा योगाः केन्द्रग्रहवर्जितः शशाङ्कश्च।
केमद्रुमोऽतिविकटः शशिनि समसतग्रहादृष्टै।।[2]

अर्थात् यदि जन्मकुण्डल्यां उपरोक्ता सुनफाादि त्रययोगेषु एकोऽपि योगः न चेत्।

परञ्च चन्द्रमा केन्द्रे न स्यात्।


तथा भौमादिग्रहाः केन्द्रे न चेत्।

तथा चन्द्रमा अन्यग्रहैः अदृष्टः स्यात् तर्हि केमद्रुमयोगः अतिकष्टदायकः भवेत् अन्यथा चन्द्रकेन्द्रस्थिते सति अन्यग्रहेण दृष्टे सति अन्यग्रहेऽपि केन्द्रे सन्ति तर्हि योगोऽयं प्रभावहीनः भवेत् अतिसाधारण फलं भवेत्।

---

1. बृहत – 13/3 2. सारा. 13/2

## केमद्रुमभङ्गयोगः




अस्यां कुण्डलयां चन्द्रतः द्वितीये–द्वादशे कोऽपि ग्रहः न चेत् अतः केमद्रुम योगो भवति। किन्तु चन्द्रः स्वकेन्द्रे स्थितोऽस्ति। चन्द्रः केन्द्रे शुक्रः भौमः केतुः सह स्थितो सन्ति।

श्रीमानसगरीकार मते –

कुमुदगहनबन्धुवीक्ष्यमाणः समस्तैर्गगन–
गृहनिवासैदीर्घजीवी जातः।
फलमशुभसमुत्थं यच्च केमद्रुमोक्तं
सभति नरनाथः सार्वभौमोजितारि।।[1]

---

1. मानसागरी – 1/264

मानसागरीग्रन्थे अपि पूर्वोकतानामाचार्याणामतानुसारेण केमद्रुम योगलक्षणानि कथितानि। परञ्च तद योगभङ्गविषये किञ्चित विशेषमतं प्रकटितम्। यथा –

जन्मकुण्डल्यां केमद्रमयोगभवेत तर्हि अपि चन्द्रः शेषसवैरपि ग्रहैः दृष्टः स्यात् तर्हि पूर्वोक्त अशुभफलं न प्राप्यते। अपितु सः जातकः दीर्घजीवी जितरि भवेत् तथा सः सार्वभौ4 राजा भवेत्।

यदि तत्र चन्द्रग्रहः पूर्णबली भूत्वा शुभस्थाने स्थितो चेत्।

बुध–गुरु–शुक्रै सुयक्तो चेत् तर्हि केमद्रुमयोगे जातेऽपि सः धन–पुत्र–सुखादि प्राप्यते तथा तस्य मङ्गलपूर्वकं सुप्रसिद्धिं भवेत्।